# ॥ राधोपनिषदोक्त राधानामानि ॥

राधा रासेश्वरी रम्या कृष्णमन्त्राधिदेवता ।
सर्वाद्या सर्ववन्द्या च वृन्दावनविहारिणी ॥
वृन्दाराध्या रमाशेषगोपीमण्डलपूजिता ।
सत्या सत्यपरा सत्यभामा श्रीकृष्णवल्लभा ॥
वृषभानुसुता गोपी मूलप्रकृतिरीश्वरी ।
गान्धर्वा राधिकाऽऽरम्या रुक्मिणी परमेश्वरी ॥
परात्परतरा पूर्णा पूर्णचन्द्रनिभानना ।
भुक्तिमुक्तिप्रदा नित्यं भवव्याधिविनाशिनी ॥

राधा ॥ १॥ रासेश्वरी ॥ २॥ रम्या ॥ ३॥ कृष्णमन्त्राधिदेवता ॥ ४॥
सर्वाद्या ॥ ५॥ सर्ववन्द्या ॥ ६॥ वृन्दावनविहारिणी ॥ ७॥ वृन्दाराध्या ॥ ८॥
रमा ॥ ९॥ अशेषगोपीमण्डलपूजिता ॥ १०॥ सत्या ॥ ११॥ सत्यपरा ॥ १२॥
सत्यभामा ॥ १३॥ श्रीकृष्णवल्लभा ॥ १४॥ वृषभानुसुता ॥ १५॥ गोपी ॥ १६॥
मूलप्रकृति ॥ १७॥ ईश्वरी ॥ १८॥ गान्धर्वा ॥ १९॥ राधिका ॥ २०॥
आरम्या ॥ २१॥ रुक्मिणी ॥ २२॥ परमेश्वरी ॥ २३॥ परात्परतरा ॥ २४॥
पूर्णा ॥ २५॥ पूर्णचन्द्रनिभानना ॥ २६॥ भुक्तिमुक्तिप्रदा ॥ २७॥ भवव्याधिविनाशिनी ॥ २८॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

Please send corrections to sanskrit@cheerful.com
Last updated December 24, 2002